चतुर्दशः पाठः १४

# आम्लं द्राक्षाफलम्

( अव्ययप्रयोगः )

एकः शृगालः

एकः शृगालः वनं गच्छति।

पिपासा, तस्य बुभुक्षा

पिपासया बुभुक्षया च सः वनं गच्छति

सः वनं गच्छति, सः वनं गच्छति।

तत्र गच्छति, किमपि न लभते

इतोऽपि गच्छति, किमपि न लभते

श्रान्तः जायते, खिन्नः जायते

किं च करोति ? सः किं च करोति ?

वामतः पश्यति, दक्षिणतः पश्यति

अग्रतः पश्यति, पृष्ठतः पश्यति

स्वेदः जायते, तृषा जायते

तस्य स्वेदः जायते, तृषा जायते

किं च पश्यति ? सः किं च पश्यति ?



पश्यति द्राक्षालतां

सः पश्यति द्राक्षाफलम्

उपरि उपरि लतासु दृश्यते च तत्फलम्

अनुक्षणं तन्मुखे रसः जायते

किं च करोति? सः किं च करोति ?



एकवारम् उत्पतति, द्विवारम् उत्पतति

त्रिवारम् उत्पतति, पुनः पुनः उत्पतति

स्वेदः जायते, तस्य श्रमः जायते।

किं कथयति? सः किं कथयति?

आम्लं द्राक्षाफलम्

आम्लं द्राक्षाफलम्

इत्येवं कथयति पलायते

इत्येवं कथयति पलाऽऽयते ।।

- डॉ. नारायणभट्ट

**अध्यापकाय निर्देशः -**

। अध्यापकः कक्षायां कथायाः सस्वरवाचनं कारयेत् येन विद्यार्थिनः कथां कण्ठस्थीकृत्य श्रावयितुं समर्थाः भविष्यन्ति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| शृगालः | जम्बुकः/जम्बूकः | सियार |
| पिपासा | पातुम् इच्छा | प्यास |
| बुभुक्षा | खदितुम् इच्छा | भूख |
| लभते | प्राप्नोति | प्राप्त करता है |
| इतोऽपि | अस्मात् अपि | यहाँ से भी |
| श्रान्तः | क्लान्तः | थका हुआ |
| खिन्नः | दुःखितः | दुःखी |
| वामतः | वामपार्श्वे | बायीं ओर |
| दक्षिणतः | दक्षिणपार्श्वे | दायीं ओर |
| अग्रतः | अग्रभागे | आगे |
| पृष्ठतः | पृष्ठभागे | पीछे |
| स्वेदः | स्वेदबिन्दव : | पसीना |
| तृषा | पिपासा | प्यास |
| द्राक्षालताम् | द्राक्षालतिकाम् | अंगूर की बेल को |
| द्राक्षाफलम् | फलविशेषः | अंगूर |
| उपरि-उपरि | अधिकम् ऊर्ध्वम् | बहुत ऊपर |
| अनुक्षणम् | तत्समये | उसी समय |
| तन्मुखे | तस्य आनने | उसके मुँह में |
| उत्पतति | उच्छलति | उछलता है |
| पलायते | पलायनं करोति | भाग जाता है (चला जाता है) |
| आम्लं | अम्लतायुक्तम् | खट्टा |

## अभ्यासः

### १. उच्चारणं कुरुत -

| | | | |
|---|---|---|---|
| शृगालः | बुभुक्षया | इतोऽपि | श्रान्तः |
| खिन्नः | द्राक्षालताम् | अनुक्षणम् | उत्पतति। |

### २. एकपदेन उत्तरत -

(क) शृगालः कुत्र गच्छति?

(ख) कः श्रान्तः जायते?

(ग) शृगालः किं पश्यति?

(घ) कीदृशं द्राक्षाफलम्?

### ३. एकवाक्येन उत्तरत -

(क) शृगालः कथं वनं गच्छति?

(ख) खिन्नो भूत्वा शृगालः कुत्र-कुत्र पश्यति?

(ग) लतासु फलम् कुत्र दृश्यते?

(घ) किं कथयित्वा शृगालः पलायते?

### ४. रिक्तस्थानानि पूरयत -

(क) पिपासया................. च सः वनं गच्छति।

(ख) श्रान्तः जायते, ........................ जायते।

(ग) स्वेदः जायते तस्य..................... जायते।

(घ) अनुक्षणं तन्मुखे...................... जायते।

### ५. अव्ययपदानां प्रयोगेण वाक्यनिर्माणं कुरुत -

**यथा**-(क) वामतः - बालिका वामतः चलति।

(ख) दक्षिणतः - ..............................................

(ग) उपरि - ..............................................

(घ) तत्र - ..............................................

(ङ) इतः - ..............................................

## ६. परस्परं सुमेलयत-

| | |
|---|---|
| (क) वामतः पश्यति | पुनः पुनः उत्पतति |
| (ख) एकः शृगालः | पलायते |
| (ग) त्रिवारम् उत्पतति | दक्षिणतः पश्यति |
| (घ) इत्येवं कथयति | वनं गच्छति |

## ७. क्रियापदानां रूपाणि लिखत -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा - | गच्छति | गच्छतः | गच्छन्ति |
| (क) | .................. | पश्यतः | .................. |
| (ख) | उत्पतति | .................. | .................. |
| (ग) | .................. | .................. | कथयन्ति |
| (घ) | .................. | चलतः | .................. |
| (ङ) | खादति | .................. | .................. |

## योग्यता-विस्तारः

अस्मिन् पाठे भवन्तः गीतस्य माध्यमेन कथायाः आनन्दं प्राप्तवन्तः स्युः। गीते तत्र, च, किम्, इतोऽपि इत्यादयः शब्दाः अपि मध्ये मध्ये सन्ति। एते अव्ययशब्दाः सन्ति।

**येषां शब्दानां सप्तसु विभक्तिषु, त्रिषु लिङ्गेषु, त्रिषु वचनेषु च रूपं समानं भवति, ते अव्ययशब्दाः भवन्ति।**

आगच्छन्तु, प्रमुखाणाम् अव्ययशब्दानां विषये जानीमः -

| अव्ययशब्दः | हिन्दी अर्थ | वाक्यप्रयोगः |
|---|---|---|
| अत्र | यहाँ | पुस्तकम् अत्र अस्ति। |
| तत्र | वहाँ | द्वारं तत्र अस्ति। |
| अन्यत्र | दूसरी जगह | चिकित्सालयः अन्यत्र अस्ति। |
| सर्वत्र | सब जगह | ईश्वरः सर्वत्र अस्ति। |
| कुत्र | कहाँ | लेखनी कुत्र अस्ति? |
| च | और | बालकः बालिका च पठतः। |
| अपि | भी | सः धावति। अहम् अपि धावामि। |
| इव | के समान | लतामङ्गेशकरः कोकिला इव गायति। |
| प्रातः | सुबह | सूर्योदयः प्रातः भवति। |
| सायम् | शाम | बालकः सायं पूजां करोति। |

| | | |
|---|---|---|
| सर्वदा | हमेशा | अहं सर्वदा सत्यं वदामि। |
| इदानीम् | अब | इदानीं वयं गच्छामः। |
| अद्य | आज | अद्य गुरुवासरः अस्ति। |
| श्वः | कल (आने वाला) | श्वः शुक्रवासरः भविष्यति। |
| ह्यः | कल (बीता हुआ) | ह्यः बुधवासरः आसीत्। |
| किम् | क्या | बालकः किं पठति? |
| कथम् | कैसे | भवतः स्वास्थ्यं कथम् अस्ति? |

## आगच्छन्तु, वयं खेलामः

अस्मिन् पाठे भवन्तः पठितवन्तः यत् शृगालः द्राक्षाफलं खादितुं प्रयासं करोति। भवन्तः अपि विविधफलानि खादन्ति एव। फलैः सह अन्यान् खाद्यपदार्थान् अपि खादन्ति। एकादशपाठस्य योग्यता-विस्तारे भवन्तः खाद्यपदार्थानां नामानि पठितवन्तः। तेषाम् आधारेण वयम् एकां क्रीडां कुर्मः -

### खादामः

सर्वे छात्राः मण्डलाकारे उपविशन्ति।

अध्यापकः सूचयति-'अहं विविधवस्तूनां नामानि वदिष्यामि। यदा अहं खाद्यपदार्थानां नामानि वदिष्यामि, तदा भवन्तः हस्तौ उपरि कृत्वा 'खादामः' इति वदिष्यन्ति। किन्तु यदि खाद्यपदार्थस्य स्थाने अहम् अन्यपदार्थस्य नाम वदामि तर्हि भवन्तः हस्तौ उपरि न कृत्वा मौनपूर्वकं तिष्ठन्तु।

अधुना अध्यापकः एकम् एकं कृत्वा खाद्यपदार्थानां नामानि उच्चारयति। यथा- रोटिका, पायसम्, ओदनम् इत्यादीनि।

छात्राः हस्तौ उपरि कृत्वा 'खादामः' इति वदन्ति। अध्यापकः मध्ये-मध्ये खाद्यपदार्थानां स्थाने अन्यवस्तूनां नामानि वदति। यथा- पुस्तकम्, व्यजनम्, उत्पीठिका इत्यादीनि। तदा छात्राः मौनपूर्वकं तिष्ठन्तु।

अस्यां क्रीडायां यः छात्रः खाद्यपदार्थानाम् उच्चारणसमये हस्तौ उपरि कृत्वा 'खादामः' इति न वदति सः बाह्यः भवति। एवमेव यः छात्रः अन्यवस्तूनां नामोच्चारणसमये त्रुटिवशात् 'खादामः' इति वदति अथवा हस्तौ उपरि करोति, सः अपि बाह्यः भवति।